योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०८३

< योगवासिष्ठः | प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)

त्र्यशीतितमः सर्गः ८३

श्रीवसिष्ठ उवाच ।

अणिमादिगुणैश्वर्ययुक्ता सा नृपभामिनी ।

एवं बभूव चूडाला घनाभ्यासवती सती ।। १

जगामाकाशमार्गेण विवेशाम्बुधिकोटरम् ।

चचार वसुधापीठं गङ्गेवामलशीतला ।। २

क्षणमप्यगता भर्तुर्वक्षसश्चेतसस्तथा ।

सर्वेषूवास राज्येषु लक्ष्मीरिव जगत्सु च ।। ३

आकाशगामिनी श्यामा विद्युत्प्रारम्भभूषणा ।

बभ्राम मेघमालेव गिरिमाला महीतले ।। ४

काष्ठं तृणोपलं भूतं खं वातमनलं जलम् ।

निर्विघ्नमविशत्सर्वं तन्तुर्मुक्ताफलं यथा ।। ५

मेरोरुपरि श्रृङ्गाणि लोकपालपुराणि च ।

दिग्व्योमोदररन्ध्राणि विजहार यथासुखम् ।। ६

तिर्यग्भूतपिशाचाद्यैः सहनागामरासुरैः ।

विद्याधराप्सरःसिद्धैर्व्यवहारं चकार सा ।। ७

यत्नेन तं च भर्तारमात्मज्ञानामृतं प्रति ।

बहुशो बोधयामास चूडाला न विवेद सः ।। ८

कलाविदग्धा मुग्धा च बालेयं गृहिणी मम ।

इत्येवं केवलं राजा स चूडालां विवेद ताम् ।। ९

एतावतापि कालेन तामेवंगुणशालिनीम् ।

बालो विद्यामिव नृपश्चूडालां न विवेद सः ।। १०

साप्यलब्धात्मविश्रान्तेस्तां सिद्धिश्रियमात्मनः ।

दर्शयामास नो राज्ञः शूद्रस्येव मखक्रियाम् ।। ११

श्रीराम उवाच ।

महत्याः सिद्धयोगिन्यास्तस्या अपि शिखिध्वजः ।

यत्नेन प्राप नो बोधं बुध्यतेऽन्यः कथं प्रभो ।। १२

श्रीवसिष्ठ उवाच ।

उपदेशक्रमो राम व्यवस्थामात्रपालनम् ।

ज्ञप्तेस्तु कारणं शुद्धा शिष्यप्रज्ञैव राघव ।। १३

न श्रुतेन न पुण्येन ज्ञायते ज्ञेयमात्मनः ।

जानात्यात्मानमात्मैव सर्पः सर्पपदानि व ।। १४

श्रीराम उवाच ।

एवंस्थिते वाथ मुने कथमेतज्जगत्स्थितौ ।

क्रमो गुरूपदेशाख्यः स्वात्मज्ञानस्य कारणम् ।। १५

श्रीवसिष्ठ उवाच ।

अत्यन्तकृपणः कश्चित्किराटो धनधान्यवान् ।

अस्ति विन्ध्याटवीकक्षे कुटुम्बी ब्राह्मणो यथा ।। १६

तस्यैकदा निपतिता गच्छतो विन्ध्यजङ्गले ।

एका वराटिका राम तृणजालकसंवृते ।। १७

कार्पण्यात्स प्रयत्नेन सर्वं तृणतुषादिकम् ।

कपर्दकार्थमभितो दुधाव दिवसत्रयम् ।। १८

कपर्दकाः स्युर्भवता चत्वारोऽष्टौ च कालतः ।

ततः शतं सहस्रं च सहस्रे चेति चेतसा ।। १९

कलयञ्जङ्गले दीनो रात्रिंदिवमतन्द्रितः ।

जनहाससहस्राणि बुबुधे न परं तु सः ।। २०

ततो दिनत्रयस्यान्ते तेन तस्माच्च जङ्गलात् ।

पूर्णेन्दुबिम्बप्रतिमो लब्धश्चिन्तामणिर्महान् ।। २१

तं प्राप्य तुष्टहृदयः समागम्य गृहं सुखम् ।
प्राप्ताखिलजगद्भूतिः शान्तसर्वतया स्थितः ।। २२
एवं यथा किराटेन कपर्दान्वेषणेन तत् ।
रत्नं लब्धं जगन्मूल्यमहोरात्रमखेदिना ।। २३
तथा श्रुतोपदेशेन स्वात्मज्ञानमवाप्यते ।
अन्यदन्विष्यते चान्यल्लभ्यते हि गुरुक्रमात् ।। २४
ब्रह्म सर्वेन्द्रियातीतं श्रुतादीन्द्रियसंविदः ।
तेनोपदेशादनघ नात्मतत्त्वमवाप्यते ।। २५
गुरूपदेशं च विना नात्मतत्त्वागमो भवेत् ।
केन चिन्तामणिर्लब्धः कपर्दान्वेषणं विना ।। २६
तत्त्वस्यास्य महार्थस्य गुरूपकथनं गतम् ।
अकारणं कारणतां मणेरिव कपर्दकः ।। २७
पश्य राघव मायेयं मोहिनी महतामपि ।
अन्यदन्विष्यते यत्नादन्यदासाद्यते फलम् ।। २८
अन्यत्करोति पुरुषः फलमन्यदेव
प्राप्नोति यत्त्रिषु जगत्स्ववलोक्यते च ।
तस्मादनन्तरभवस्य जगद्भ्रमस्य
श्रेयोऽतिवाहनमसङ्गमनिच्छयैव ।। २९
इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० चू० किराटोपाख्यानं नाम त्र्यशीतितमः सर्गः ।। ८३ ।।